# gurustutiH

# गुरुस्तुतिः

## Document Information

Text title : Guru Stutih 5 by Rameshvaracharya

File name : gurustutiHrAmeshvarAchArya.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Rameshvaracharya

Transliterated by : Swathi R Venkat

Proofread by : Swathi R Venkat

Latest update : May 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 14, 2021

*sanskritdocuments.org*

# गुरुस्तुतिः

ॐ

श्रीगुरवे शिवाय नमः ।

अस्त्यस्मिन्महसां महानिधिरसौ देवो विवस्वान् महान्
यस्मिञ्जाग्रति जाग्रतीव रजनीसुप्ता इमे जन्मिनः ।
किन्त्वेका महती ततो विजयते श्रीदैशिकाङ्घ्रिद्युति-
र्यद्भासाच्छुरितं चिरन्तनतमो हित्वैव जागर्ति सत् ॥ १॥

ऊर्जस्य शुक्ले च तिथौ चतुर्थ्यां
जगज्जिगीषून् स्वत ऊर्जयन्तः ।
आविर्बभूवुर्महताबकाकाः
काश्मीरकण्डाभिधजन्मभूमौ ॥ २॥

येऽस्माननेकानभिधाय दिव्यं
ज्ञानञ्च जग्मुर्निजधाममध्ये ।
तपस्य शुक्लस्य तिथौ द्वितीये
सूर्याब्जयोः सन्धिमयेऽप्यनेहसि ॥ ३॥

अद्यापि येऽस्मानभिबोधयन्ति प्रयाणरूपेण निजेन कर्मणा ।
प्रकाशरूपप्रथितैकधाम्नि रवीन्दुमध्ये जहतः शरीरम् ॥ ४॥

यज्जमना शर्मणगोष्यवात्स्यगोत्रं तथागोत्रमवापि लोके ।
अभ्युन्नतिं लोकहितैकहेतुं सर्वासु दिक्षु प्रसरत्प्रभावाम् ॥ ५॥

तानद्य सर्वे वयमाविशन्तो गुरून्स्मरन्तो मनसाथ वाचा ।
विशुद्धभक्त्या प्रणता नमामः स्थिताञ्च ज्ञानप्रभयागतानपि ॥ ६॥

तज्ज्ञानगोत्रे गुरवश्चकासति ज्ञानप्रभाभिः प्रसृताभिरद्य ।
श्रीलक्ष्मणाख्या नमतां जनानां दृष्ट्यैव दृष्टेस्तमसां विघातकाः ॥ ७॥

गुरुशिष्यस्वरूपेण दृश्यते यद्यपि द्विधा ।

तथापि श्रीगुरुः साक्षादेक एव विराजते ॥ ८॥

इति श्रीरामेश्वराचार्यवर्यनिर्मितानि गुरुस्तुतिः पद्यानीति शिवम् ।

Encoded and proofread by Swathi R Venkat

*gurustutiH*

pdf was typeset on May 14, 2021

Please send corrections to *sanskrit@cheerful.com*